# Kailasavarnanam 5

# કૈલાસવર્ણનમ્ ૫

## Document Information

Text title : Kailasavarnanam 5

File name : kailAsavarNanam5.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 25 - kailAsavarNane vRiSha(kRita)stutiH | 1-33||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસવર્ણનમ્ ૫

(કૈલાસશૈલે વૃષગોપુરવર્ણનમ્ ૫)

સ્કન્દઃ -

કૈલાસાન્તરતઃ પ્રાચ્યાં પુષ્પરાગવિનિર્મિતમ્ ।
પઞ્ચલક્ષપ્રમાણેન પ્રાકારવરગોપુરમ્ ॥ ૧॥

ઉદ્યદ્ભાનુશતાધિક્યચાકચક્યમનોહરમ્ ।
પુષ્પરાગમણિપ્રોદ્યદ્વૃષભૈસ્સમધિષ્ઠિતમ્ ॥ ૨॥

પ્રાકારં લક્ષમાનેન મનસા શૂલિના કૃતમ્ ।
રુદ્રાવતારચરિતૈર્વેદિકાપટ્ટિકાન્વિતમ્ ॥ ૩॥

રાજદ્વૃષભકુમ્ભાગ્રદોધૂયિતપતાકકમ્ ।
પુષ્પરાગમણિજ્યોતિતિરસ્કૃતશશિદ્યુતિ ॥ ૪॥

તત્રૈવાન્તર્મહારત્નગર્ભમણ્ડપમુત્તમમ્ ।
સ્તમ્ભૈશ્ચ દશસાહસ્રૈસ્સમુન્નતિમનોહરમ્ ॥ ૫॥

શિખાભિર્મણિકૢપ્તાભિર્વલિભિશ્ચુમ્બિતામ્બરમ્ ।
નાનારત્નમહાવેદિપીઠવિદ્રુમપુત્રિકૈઃ ॥ ૬॥

શોભિતં રત્નગુચ્છાચ્છ માલાલમ્બિતપીઠકમ્ ।
તત્ર સિહ્માસને દિવ્યે નવરત્નગણૈશ્ચિતે ॥ ૭॥

ધૂપદીપાદિબહુલે મુક્તામાલાપરિષ્કૃતે ।
વિતાનદ્યોતિદિક્ચક્રે નાનારુદ્રગણૈર્યુતે ॥ ૮॥

ષષ્ટિસાહસ્રસઙ્ખ્યાકૈરહિમન્યુભિરુદ્ધતે ।
ત્રિપુણ્ડ્રવિલસત્કાલૈ રુદ્રાક્ષવરભૂષણૈઃ ॥ ૯॥

ત્રિશૂલોદ્યત્કરૈશ્શુભ્રૈર્હેતિચાપશરાવૃતૈઃ ।
જટાતટનિબદ્ધેન્દુશેખરૈરિન્દુસમપ્રભૈઃ ॥ ૧૦॥

સમન્તાત્સેવિતો નિત્યં વૃષો ધર્માકૃતિર્મહાન્ ।
ધર્માધારમહાપાદો યુગનાભોરુપાદકઃ ॥ ૧૧॥

સન્ધ્યાંશસુખુરોદ્દામવર્ણાશ્રમકૃતાઙ્ઘ્રિકઃ ।
મણિમઞ્જીરનિનદનાનાધર્મૈકશબ્દવાન્ ॥ ૧૨॥

ચતુર્વેદોપવેદોદ્યદ્વેદાન્તિમતદન્તકઃ ।
પુરાણન્યાયમીમાંસાદ્વયતન્ત્રોરુઘણ્ટકઃ ॥ ૧૩॥

પૂર્વસિદ્ધાન્તરાદ્ધાન્તતત્વશબ્દઘણાઘણઃ ।
ગ્રૈવેયશોભિતોદારઘણ્ટાકલિતકન્ધરઃ ॥ ૧૪॥

કૈલાસો જઙ્ગમ ઇવ શૃઙ્ગદ્વયવિભૂષિતઃ ।
સુધામણ્ડલજોત્તુઙ્ગસુપાણ્ડરમહાછવિઃ ॥ ૧૫॥

સંસ્થિતો દેવદેવસ્ય સન્નિધૌ નન્દિકેશ્વરઃ ।
પઞ્ચલક્ષપ્રમાણેન ગણૈઃ (ગાત્રૈઃ) કર્પૂરસન્નિભૈઃ ॥ ૧૬॥

ઉદ્યત્સુધાંશુપૂર્ણાઙ્ગો લક્ષયોજનપૃષ્ટભૂઃ ।
કકુદા દશસાહસ્રયોજનોન્નતવૃત્તયા ॥ ૧૭॥

મુખેન ત્રિંશત્સાહસ્રં નેત્રયોર્દ્વિસહસ્રકમ્ ।
કર્ણયોઃ પઞ્ચસાહસ્રં વિષાણે ચ સહસ્રકમ્ ॥ ૧૮॥

નાસાવિવરમુક્તાચ્છનાસાપઞ્ચસહસ્રકમ્ ।
સહસ્રયોજનાયામલેલિહાનાગ્રજિહ્વકમ્ ॥ ૧૯॥

પશ્યન્નનિમિષેણૈવ લોચનાભ્યાં મહેશ્વરમ્ ।
સ્વપૃષ્ટાસ્તૃતરત્નાચ્છપલ્યઙ્કાલમ્બિમૌક્તિકમ્ ॥ ૨૦॥

સ્વનાસાવિવરોત્થાનવાતોદ્ભૂત મહાગિરિમ્ ।
તદ્વાતોદ્ધૂતવેલાશ્ચ ચોદ્યતોદ્યત્તરઙ્ગકાઃ ॥ ૨૧॥

સમુદ્રાસ્સરિતશ્ચૈવ તચ્ચલત્ખુરદારિતા ।
ભૂર્ભાતિ કમ્પિતા શૈલૈસ્સાગરૈશ્ચ વિલોલિતા ॥ ૨૨॥

શૃઙ્ગકોટિમણિભ્રાજિમુકુટેન વિરાજિતમ્ ।
કર્ણાલમ્બિશશિજ્યોતિધવલાલમ્બિચામરમ્ ॥ ૨૩॥

પઞ્ચાશલ્લક્ષમાનેન પદૈઃ ખુરવરૈર્યુતમ્ ।
દશસાહસ્રવિસ્તારૈરિન્દ્રનીલમણિપ્રભૈઃ ॥ ૨૪॥

ખુરાઘૃષ્ટગિરિવ્રાતં નાદમોદિતકન્દરમ્ ।
સાસ્ત્રયા લમ્બિતાસ્વચ્છપઞ્ચસાહસ્ત્રયોજનમ્ ॥ ૨૫॥

હુંભારવમહાભીત ત્રૈલોક્યતલવાસિનમ્ ।
કામધેનુગણૈશ્ચૈવ કોટિભિઃ પરિતોવૃતમ્ ॥ ૨૬॥

શરચ્ચન્દ્રપ્રભાભાસ્વદ્ભિરિમૌલિવિદારણમ્ ।
લમ્બિના વૃષણેનાપિ શતયોજનકેન ચ ॥ ૨૭॥

વાલેન ત્રિંશત્સાહસ્રયોજનેન વિલમ્બિના ।
ચામરાગ્રમહાકેશપુચ્છભારેણ શોભિતઃ ॥ ૨૮॥

મુક્તામાણિક્યજાલૈશ્ચ પ્રોત્થિતેન મણિપ્રભઃ ।
તત્રાસ્તિ ગોપુરં શમ્ભોર્ધામતત્ર વૃષેશિતુઃ ॥ ૨૯॥

પ્રાકારરાજદ્વૃષભં તસ્યેષ્ટંલિઙ્ગમૈશ્વરમ્ ।
કામધેનૂધસોદ્ભૂતૈઃ પયોભિરભિષિચ્ય ચ ॥ ૩૦॥

ગન્ધૈર્બિલ્વૈશ્ચ મન્દારૈઃ પઙ્કજૈર્ધૂપદીપકૈઃ ।
નૈવેદ્યૈઃ પાયસાપૂપતામ્બૂલછત્રચામરૈઃ ॥ ૩૧॥

સમ્પૂજ્યસ્તૌતિધર્મેશં ભસ્મરુદ્રાક્ષભૂષિતઃ ।
મુક્તાત્રિપુણ્ડ્રભાલાઙ્ગો શશિધૃક્છૃઙ્ગયોર્દ્વયોઃ ॥ ૩૨॥

પશ્યન્ત્સંસ્તૌતિ હૃષ્ટાત્મા નાદકીલિતદિક્તટઃ ॥ ૩૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે વૃષગોપુરવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૫ - કૈલાસવર્ણને વૃષ(કૃત)સ્તુતિઃ । ૧-૩૩॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 25 - kailAsavarNane vRRiSha(kRRita)stutiH . 1-33..

Notes:
Skanda સ્કન્દ describes about the residence of Vṛṣabha વૃષભ (Dharma ધર્મ), towards the Eastern quarters of Mount Kailāsa કૈલાસ શૈલ, that has predominace of Topaz - viz. Puṣparāga પુષ્પરાગ; and mentions about the Śivaliṅga શિવલિઙ્ગ that He worships there.

Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasavarnanam 5*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*